JETIR.ORG ISSN: 2349-5162 | ESTD Year : 2014 | Monthly Issue
JOURNAL OF EMERGING TECHNOLOGIES AND INNOVATIVE RESEARCH (JETIR)
An International Scholarly Open Access, Peer-reviewed, Refereed Journal

**शीर्षक:**

# अभिज्ञानशाकुन्तलस्य मंगलाचरणमाधारीकृत्य शोधपत्रम् I (Article)

**डा: सुरेश कुमार पन्डा**

प्राध्यापक: पंचायत उच्च माध्यमिक विद्यालय:

पलसागोरा, जिल्ला- बौद्धः, पिन्- ७६२०३०, ओड़िशा

**डा: सुभाष चन्द्र सैनी**

प्राचार्य मा भारती टीचर्स ट्रेनिंगकलेज

डुंडलोड, जिल्ला- झुंन्झुनु, राजस्थानं, पिन्- ३३३७०२

**ॐ**

**श्री**

अथ भवान् कविकुलगुरु: कालिदास: अभिनेयार्थं दृश्यकाव्यविशेष ब्याचिकीर्षु समाप्तिकाम: मंगलमाचेरत् इति शिष्टाचारानुसारं निर्विघ्नं परिसमाप्तये स्व ईष्टदेवता स्मरणात्मकं मंगलभारचरन- आशीर्नमस्क्रियारूप: श्लोक: काव्यार्थसूचकं नान्दीति कथ्यते इति I

भरतादिर्भिर्व्या कृतम् अवान्तर बाक्यात्मकाष्ट पदभूषितां सर्व आनन्दिनीं पूर्वसूत्र धारे: या सृष्टि: स्त्रष्टुराद्या या तनु: स्त्रष्टु: ब्रह्मण: आद्यासृष्टि: सर्ग: जलमयीमूर्त्ति:, यातनु: विधिकृतं श्रुति स्मृत्युक्त विधानेन विधिपूर्वकम् अग्नौ समर्पितं हवि: होमद्रव्यं घृतादिकं वहति धारयति, देवान् प्रपयति वह्निमयि मूत्तिर्ति अर्थ: I या च अपरा तनु: जुहोतिति होत्री हवन कर्त्ति यजमान स्वरूपां I ये द्वे कालं समयं रात्रिन्दिनं विधत्त: व्यवस्थापयत: I तथा च चन्द्रात्मकं सूर्यात्मकं चेति तनुद्वयंमिति अर्थ: I यातनु श्रुतेर्विषय: गुणा: श्रुते: श्रवणेन्द्रियस्य विषय: गोचर: इति श्रुति विषय: गुणो यस्या: सा श्रुतिविषय गुणा: श्रवणेन्द्रियग्राह्य शब्दाख्य विशेष गुण: शालिनी विश्वं समस्तं जगत् ब्याप्य ब्याप्तं कृत्वा स्थिता: वर्त्तते I आकाशाख्या भगवतो मूर्त्तीति अर्थ: या तनुं सर्वविज प्रकृति: सर्वेषां समस्तानां वीजानां सस्यादीनां प्रकृति: सर्वं विध सस्या सस्याध्यांकुरयोनि: इति एकम् आहु:, कथयन्ति विद्वांष: I सर्वांकुरु कारणभूता पृथ्वीरूपा तनुइति अर्थ: I यया वायुरुपया तन्वा प्राणिन: शरिरिण: प्राणवन्त: चेतन्यभाजो भवन्ति I वायुरुपा मूर्त्ति रित्यर्थ: I ताभि: पूर्वोक्ताभि: प्रतक्ष्याभि: स्थुल वुद्धिशिरपि प्रत्यक्षंमुपलभ्य मानाभि: अष्टसंख्याभि: जलवह्नि यजमानं चन्द्र-सूर्य, गगन धरणी वायुरूपाभि: तनुभि: प्रपन्न: युक्तं ईष्टे इति ईश: चराचरनियन्ता शक्ति: विभिष्टो भगवान शिव: व: युष्मान् सभ्यान् अस्मान् नटांदींक्ष अवतु I रक्षतु शुभोदयेन योजयतु इत्यर्थ: I एवं विश्वास्मिन्नवष्टमूर्त्तिर्भवति समेषां प्रत्यक्षम् I

अभिज्ञानशाकुन्तले नाटके ईश्वरस्य अष्टस्वरूपं सांप्रतिकी विज्ञान युगेऽपि उपादेयतामस्ति ।

“यासृष्टि स्त्रष्टुराद्या वहति विधिहुतं याहविर्याचहोत्री

ये द्वे कालंविधत्तः श्रुतिविषयगुणा यास्थिताब्याप्तविश्वम् ।

यामाहुः सर्ववीज प्रकृतिरिति यया प्राणिनः प्राणवन्तः

प्रतक्ष्याभिः प्रपन्नतनु भिरवतुवस्ताभिरष्टाभिरिशः ।।” (अभि-१-नान्दी)

## संदर्भ ग्रन्थसूची


१. डाः त्रिपाठी कृष्णमणि, चौखम्बा सुरभारती प्रकाशन, वारणासी-२२११००१

डिलक्स अफसेट् प्रिण्टर्स, दिल्ली


१. या सृष्टिः- सष्टिराद्या सृष्टिः जलम् । वैज्ञानिकाः रपिस्वीकुर्वन्ति । जलंविना सृष्टेः संभवं न भविष्यति । मंगलग्रहे, चन्द्रपृष्टे जलंनास्तिः अतः तत्र जीवनानां नैव संभवम् । जलंविना वृक्षारपिन जीविष्यन्ति येन अम्लजानस्या भावात्, अंगारकाम्लस्य वृद्धित्वात् उत्तापस्य वृद्धिहेतोः उत्तरमेरोः वरफोच्छन्नानि गलेसियर (वरफावृत्ताञ्चलः) अपि तरलत्वात् पुनः १/३ भागान जलान् मग्नं भविष्यन्ति । येन पुनः प्रलयं भविष्यति । दिल्ली, चेन्नाई, वेंगालुरु, भारते, ................ २०३०तः जलं संकटं नूनं भविष्यति । जलाशायाः शुष्कं भवति, परन्तु भूगर्भ जलमाविष्कारमस्ति । दिल्ली प्रथमस्थाने अस्ति ।

२. वहति विधिहुतं यदापि विधिविधानं पूर्वकं अपितंमाहुतिः यः वहति स अग्निरपि ईश्वरस्य एकरूपम् । ऋग्वेदे १.१.१. (१) मन्त्रे कथ्यते यत् ओमग्निमीडे पुरोहितं यज्ञस्य देवं रुत्विजं होतारं रुत्नधातमम् । यज्ञे अग्नि । यस्य देवस्य नाग्ना हविः समर्प्यते अग्निः तं देवं तत् प्रापयन्ति । पुनः अग्निरविना आदिम मनुष्य इव वयं भवामः । स एव अग्निमाविष्कृत्य पूजाकरोति स्म । अस्माकं शरीरे जठरे अस्ति । येन अस्माकं श्वाधानि परिपक्वानि भवन्ति । अन्यथा अस्माकमाधुनिकः जीवनं नैव संभवम् । जलेऽपि अग्निरस्ति तत वाडवाग्निरूपेण समुद्रे परिचितम् । अग्निः पवित्रः । पार्वती तपोवने तपस्या कालेअग्निं प्रज्वलितं कृत्वा पर्णकुटिरे संस्थापिता । “तपोवनं तच्चवभूव पावनम्” । यज्ञे सर्वं परिवेशं पवित्रं भवति । गीतायोमस्ति यत्-

“अन्नात् भवन्ति भूतानि पर्यन्यादन्नसंभवः

यज्ञाद्भवतिपर्जन्यो यज्ञः कमसमद्भवः ।।” (गीता-३/१४) (२)

श्रीमद्भगवतगीता (जयदयाल गोयन्दका, पुर्नुद्रण-२०१७, गीताप्रेस्, गोरखपुर)

कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरंसमुद्भवम्

तस्मात् सर्वगतं ब्रह्म नित्यंयज्ञेप्रतिष्ठितम् । (गीता-३/१५) (३)

स्वामी रामसुख दास ।

## संदर्भ ग्रन्थसूची


१. ऋग्वेदे १.१.१.

२. “अन्नात् भवन्ति भूतानि पर्यन्यादन्नसंभवः

यज्ञाद्भवतिपर्जन्यो यज्ञः कमसमद्भवः ।।” (गीता-३/१४)

श्रीमद्भगवतगीता (जयदयाल गोयन्दका, पुर्नुद्रण-२०१७, गीताप्रेस्, गोरखपुर)

३. कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरंसमुद्भवम्
तस्मात् सर्वगतं ब्रह्म नित्यंयज्ञेप्रतिष्ठितम् । (गीता-३/१५) स्वामी रामसुख दास ।

अग्निः वेदेषु पुराणेषु देवेतारूपेण परिपूज्यते । यतः ऋषयः २५०० वर्षात्पूर्वं गुरुकुलेषु सर्वदा यज्ञकर्मणि कुर्वन्ति स्म । रामायणेमहापुराणे दशरथः एव ऋषिभिसह यज्ञं कृत्वा चरु अन्नैः पुत्रान् अलभत पुरा यज्ञकर्मेषु तपस्वि तपस्यादिकं तथा दैनन्दिनानि कर्माणि संपादितानि । पार्वती पुरायुगे तपस्यायां दैनन्दिनानि कर्माणि यज्ञकर्माणि अपि कुर्वन्ति स्म । कालिदासेनापि कुमार संभवे पावत्याः ग्रीष्म तपः विषये वर्णितम् । यथा-

"शुचौचतुर्णां ज्वलतां हविर्भुजां

शुचिस्मिता मध्यगता सुमध्यमा ।

विजित्यनेत्र प्रतिघातिनिं प्रभाम्

ननन्य दृष्टिः सवितारमैक्षत ॥" (कुमार५/२० ग्रीष्म) (१)

कुलपतिः कण्वः हवनं कृत्वा चतुः पार्श्वेव शकुन्तलां परिक्रमणं कारयामासः ।

अमीं वेदिं परितः क्लुप्तधीष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्ण्णदर्भाः

अपघ्नन्तो दुरितं हब्यगन्धैः-वैतानास्त्वां वन्हयः पावयन्तु । (अभि-४/१०) (२)

दिलिपः ९९ विश्वजित् यागान् कृत्वा रघुं राजानं कृत्वा सस्त्रीकं अरण्यं जगाम ।

कालिदास ग्रन्थावली डाः पट्टनायक त्रिनाथ । (३)

शतं यज्ञं कुर्वन् काले इन्द्रः अश्वं चोरितवान् । येन तस्य सहस्र सगरपुत्राः पालं पातलं पुरमत्वा कपिलमुनेः आश्रमेण अश्वं दृष्ट्वा मुनिवरमाश्वचौरं मत्वा तपस्यतः तमत्याचारं कुर्वन्ति स्म । तेन क्रोधवलेन षष्ठिसहस्राः सगरपुत्राः दग्धिभूताः पश्चात् भगिरथः तपोवलेन गंगा षष्ठिसहस्रान् मुक्तमकुर्वन् । इत्थं कालिदासस्य लेखनिषु यज्ञाः वर्णिताः ।

**<u>संदर्भ ग्रन्थसूची</u>**

१. "शुचौचतुर्णां ज्वलतां हविर्भुजां । शुचिस्मिता मध्यगता सुमध्यमा ॥
विजित्यनेत्र प्रतिघातिनिं प्रभाम् । ननन्य दृष्टिः सवितारमैक्षत ॥" (कुमार५/२० ग्रीष्म)

२. अमीं वेदिं परितः क्लुप्तधीष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्ण्णदर्भाः
अपघ्नन्तो दुरितं हब्यगन्धैः-वैतानास्त्वां वन्हयः पावयन्तु । (अभि-४/१०)

३. दिलिपः ९९ विश्वजित् यागान् कृत्वा रघुं राजानं कृत्वा सस्त्रीकं अरण्यं जगाम ।
कालिदास ग्रन्थावली डाः पट्टनायक त्रिनाथ ।

अग्नि वै मूलम् । संसारस्य पञ्चमहाभूतेषु क्षितिः, अपः तेजः मरुत् ब्योमः । अग्निरपि इत्थमेकं शिवस्य स्वरूपः । अग्नौमूलं प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते, आदित्या जायते वृष्टिवृष्टेरन्नं ततः प्रजाः ।

३. याचहोत्रि- यज्ञकर्मयः संपादनं करोति स एव होतायाः यज्ञ संपादनं करोति सा होत्री! तदा द्विसहस्रं वर्षात्प्रागेव राजानः ऋषयः धनिकाः सर्वे यज्ञ संपन्नाः कृतवन्तः ।

नं.१.: "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः

अपएव ससर्जादौ तासु बीजमवासृजत् ।" (मनु-स्मृति-१.१८) (१)

भगवान् शिवस्य नामेकमस्ति अष्टमूर्त्तिः । अस्य अभिप्रायः भवति यत् तस्य शरीरष्टधा विभत्कोमूत्वा विश्वस्य कल्याणं करोति । यस्य नामानि सन्ति । १. जलं, २. अग्निः, ३. यजमानः, ४. सूर्यः, ५. चन्द्रः, ६. आकाशः, ७. पृथिवीः तथा ८. वायुः अग्निः-शिवस्य अष्टमूर्त्तयः विराजिताः सः देवः ईश्वरः सृष्टेः सचालनं कर्वन् जीवमात्रस्य यः आस्तिकः यः नास्तिकः तथा-विविधं ज्ञातः अज्ञातेन मंगलं विधान करोति । नकेवलं मानवकुलस्य तथा च पशुपक्षिणामपि जीवमात्रेण कल्याणं विदधाति । विना जलेन ईश्वरस्ये क रूपेण संसारं नैव संभवम् । जलधर जीवाः तं विनां न ज्विव्यन्ति । मानवानां शरीरे प्रायः ७०% जलं भवन्ति । मस्तिष्करक्ते- ७९% स्वासयन्त्रे- ८०% जलार्भवन्ति । विदग्धः ज्ञान विलसितं विविधानिधर्माण्यपि कविवर विरचित कालिदासेन न केवलं सनातनधर्मस्य कल्याणाय जलस्थ आवश्यकतां विदधाति मुस्लिम् धर्मणि- अपि आल्ला, ईसाइ ख्रीष्टियान् तथा शिख्- वाएगुरु, बौद्ध-वुद्धदेवः, जैनैः- महावीरः, इत्यादिनु अपि जलस्य नामानि विविधानि भवन्ति परन्तु अस्य अपरिहार्यतां सर्वे स्वीकुर्वन्ति ।

विविधाभाषासु पार्सी- आब, उर्दुभाषायां- पानी, आव, लाटिन्- एकवा, मलयः- वायु (एएच्-ये) मन्दारिन शुइ रूसी- (वाह)

स्पेनिषं- अगुआ, इत्थं मनुष्य वा जीवमात्रेण जलंविना न जीविष्यन्ति । जल कोऽपि किंचित वदतु नाम सर्वे एतं विनां न

प्राणीसमाजः जीवितुं सक्यते । अतः यो कोऽपिभवतु यस्य धर्मस्य वा भवति कालिदासमतेन जलरूपा मूर्त्तिरेकः शिवस्य स्वरूपः

। तम अस्माकं मतेन एका शक्तिः ।

**संदर्भ ग्रन्थसूची**

१. "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः

अपएव ससर्जादौ तासु बीजमवासृजत् ।" (मनु-स्मृति-१.१८)

३. होत्री

यः होता यज्ञसंपन्नं करोति । पुरा गुरुकुलेषु मुख्यतया समाजेऽपि हवनकार्यं कर्वन्ति स्म । यज्ञसंपादनेन परिवेषः स्वच्छः तथा न प्रदुषितं विहीनं भवति स्म ।

अधुना यथा यन्त्रागाराणां विदुषितं धुमेन जनः प्राणिनश्च विविध प्रकाराणां विजः रूपेण परिगण्यते । वृक्षाः लताः अम्लजानान् निःसरन्ति । परन्तु वहुपरिमाणेन वायुमण्डलस्याङ्गारकाम्लान् तेषां तासां जीवितार्थं गृन्हान्ति । अतः वृक्षलताः शिवमिव समुद्रमन्थनात उत्थितः विषं पानंकृत्वा पृथिवीं रक्ष । अतः वृक्षलतातयारपि ईशस्य मंगलमयं स्वरूपं भूत्वा विषं गृन्हान्ति । परन्तु अस्मान् कोऽपि किंचिदपि वृक्षलतादिनां तुल्यं मंगलकारी न सन्ति । गीतायां वर्णनमस्ति यत्

"अर्न्नात् भवन्ति भूतानि पर्यन्यादन्नसंभवः ।

यज्ञाद्भवति पर्यन्यो यज्ञाः कर्मसमुद्भवः ।।" (गीता-३/१४) (१)

अन्नात् भवन्ति भूतानि अर्थम् अत्र अन्नं व्यापक अर्थेन व्यवहृतः । यदन्न भिन्ने भिन्नमाहार योग्यं स्थूल तथा सुक्ष्मं पदार्थेः विविधप्राणिनां शरीरमादि पुष्टं भवति । अन्न इत्यत्र सर्व खाद्य पदार्थानां वाचकं शब्दं भवति । अतः सर्वे प्राणिनाः अन्नेभ्यः उत्पन्नाः भवन्ति इत्यस्यार्थं भवति यत् सर्वप्राणिनां शरीरे रजःश्चवीर्यं रूपेण निर्मितं भवन्ति । असौ रजवीर्येण विविधानां

प्राणीनामुत्पन्नानि भवन्ति । तथा तेषां तासां च शरीरपोषणं खाद्यपदार्थैः भूयन्ते । ततः अन्नं समस्तप्राणिनाः उत्पत्तिः वृद्धिः पोषणस्यापि हेतुः भवति । श्रुतौ अपि वर्णितं यत् अन्नाद्यौव खल्विममि भूतानि जायन्ते अन्नेन जातानि जीवन्ति । (तैः३ः-३/२) (२) अर्थात् सर्वेप्राणीनः अन्तात् समुत्पन्ना भवन्ति च अन्नेन जीवनं निर्धारणानि कुर्वन्ति । अतः पर्यन्यात् अन्नंसंभवः संसारस्य स्थूलं सूक्ष्मां यतिप्रकाराः खाद्यपदार्थाः सन्ति तेषां मुत्पन्नानां कारणं भवति जलम् । एवं जलस्याधारं वृष्टिः । वृष्टेः संभवः यज्ञम् । यायं होत्री इत्यास्य अर्थं भवति न केवलं हवनं घृतादिहविः प्रदानं तेन वृष्टेः संभवम् इति केवलं न संभवति । जनानां मङ्गलाय सर्वेषां सत् कर्माणां नाम एव यज्ञः । वृष्टिः यज्ञात् भवति इति अर्थं भवेत् येन मनुष्यः सत्कर्म वा कर्त्तव्य पालनं रूपकं यज्ञमावस्यं कुर्युः । यः यज्ञसंपादनं करोति सः यजमानरिति उच्यते । सः यज्ञकर्म संपादनं कृत्वा संसारस्य मंगलं विधानं करोति । सः एकः इशस्य स्वरूपः । सः सर्वदा संसारस्य मंगलविधानं करोति ।

४/५- ये द्वे कालंविधतः- अत्र द्वे इति उत्के सूर्य्यचन्द्रौ । वैज्ञानिकानां मतैरपि सूर्यः-चन्द्रानुसारैः दिवसं रात्रिः, तिथयः, ग्रीष्मवर्षा आदि रूपेण तस्य विभाजनाभिवन्ति । अतः शास्त्रो सूर्यंच चन्द्रमसौ कालस्य कर्त्तारो उच्यते । एतौ कारणौ दिवारात्रीं भवती अतः चन्द्रात्मकं सूर्यात्मकं चेति तनुद्वयमित्यर्थम् ।

पार्वती कुमारी अवस्थायां "विविधवन्हिनां त्नमश्वरेणेन्धन संभृतेनसा" शुचौचतुर्णां अनन्य दृष्टिः सवितारमैक्षत ।" (कुमार/५-२०) (३)

**<u>संदर्भ ग्रन्थसूची</u>**


१. "अन्नात् भवन्ति भूतानि पर्यन्यादन्नसंभवः ।
यज्ञाद्भवति पर्यन्यो यज्ञाः कर्मसमुद्भवः ॥" (गीता-३/१४)

२. श्रुतौ अपि वर्णितं यत् अन्नाद्यौव खल्विममि भूतानि जायन्ते अन्नेन जातानि जीवन्ति ।
(तैः३ः-३/२)

३. "विविधवन्हिनां त्नमश्वरेणेन्धन संभृतेनसा" शुचौचतुर्णां अनन्य दृष्टिः सवितारमैक्षत ।" (कुमार/५-२०)


तथाभितप्तं सविवतुर्गभस्तिभिः मखतदीय कमलश्रीयं दधौः । (सूर्यस्य किरणावलयः) (कुमार/५-२१) (१) "अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्वरश्मयः वभूव तस्याः किलपारणाविधिःर्नवृक्षवृत्तिः न्यतिरित्क साधनः ।" (५/२२) (२)

इत्थं पार्वती सूर्य चन्द्रमसै किरणावलिं प्राप्य ततः च भक्ति आधारं कृत्वा निपतिषरश्मिप खाद्यरूपेण चन्द्रत सूधामय कीरणावलीं खाद्यरूपेणं गृहीत्वा अपणां अभूती वृक्षरूपेण जीवनं तथा सूर्यस्य सहस्त्रांशु किरणं दृष्ट्वा अतिवाहयति स्म ।

महन्तपं कृतवती । अत्र चन्द्रः सूर्यश्चरात्रि दिवसयोः प्रमाणरूपेण अवधार्येते स्म ।

६-श्रुतिविषयगुणाः- श्रुतेः श्रवणेन्द्रियस्य विषयः- गोचरः श्रवणेन्द्रियग्राह्य शब्दस्य विशेषगुणशालिनी ।

आकाशस्य च विज्ञायः शब्दो वैसेषिकोगुणः श्रोत्रोन्द्रियग्राह्यो गुणः शब्दः इत्यन्नंभदृस्तर्क संग्रहे । यदि एकः आकाशरूपी माध्यम न भवेत् तदा कुत्र शब्दस्य निष्पर्णां भवेत् । शब्दस्य श्रोत्रेन्द्रियेण श्रावणम् आकाशस्य योपचारिकं श्रोत्रेन्द्रियेण प्रत्यक्षं सर्वैरेव सर्वदा अनुभूयते । विश्वं व्याप्यं कृत्वा आकाशास्य मूर्त्तिरीति अर्थः । यामाहुः सर्ववीज प्रकृतिरीति- यां पृथिवी सर्वं अंकुरोदगमानां हेतु मूतारूपेण स्थिता पृथ्विरूपामूर्त्तिः । इयमपि भगवान् शिवास्य एकामूत्तिः । प्राणिनः प्राणवन्तः-(६) वायुः एव जीवानां प्राणाः सः स्तु भगवान् शिवस्य एकामूर्त्तिः । यं विना प्राणिनां जीवनानि न जीविष्यन्ति ।

प्रत्यक्षाभिः प्रपन्नतनुभिरष्टाभिरवतु वस्ताभिरष्टाभिरीशः

स्थुलबुद्धिभिरपि प्रत्यक्षमुपलभ्य मानाभि तनुभिः मूर्त्तिभिः

प्रपन्नः युक्तः इष्टे इति इष्टः चराचरः नियन्ताशक्तिविशिष्टा

भगवान शिवः, वः युष्मान्, अस्मान् नटादीक्ष अवतुरक्षतु शुभोदयेन योजयतु इत्यर्थः ।

(४) आकाशस्य च विज्ञेयः शब्दो वैशेषिकोगुणः- (सिःमुः)

श्रोतेन्द्रियग्राहयो गुणो शब्द इत्यन्नभट्टस्तकं संमहे ।

(५) इयं हि भूमिमुर्त्तनां शाखती योनीउच्यते ।

(६) भूमिरापोनलवा युरात्मा व्योम रविशशी

इत्यष्टौ सर्वनाकानां प्रत्यक्षहरमूर्त्तय: ।

**संदर्भ ग्रन्थसूची**


१. तथाभितप्तं सविवतुर्गभस्तिभि: मखतदीय कमलश्रीयं दधौ: ।
(सूर्यस्य किरणावलय:) (कुमार/५-२१)

२. "अयाचितोपस्थितमम्बु केवलं रसाात्मकस्योडुपतेश्चरश्मय: वभूव तस्या: किलपारणाविधि:र्नवृक्षवृत्ति: न्यतिरित्क साधन: ।" (५/२२)


यद्यपि शास्त्रोनामनुसारं हवन कृते सति शास्त्रानुसारं कालमखण्ड तथा अनादि रूपेण चलति तथापि सूर्य तथा चन्द्रानुसारं दिसवं रात्रिं च भवति तिथि वर्ष आदिकेरूपेण अस्यदेवस्यं विभाजनं भवति । अत: सूर्यचन्द्र कालस्य वक्तारं भवं । अत्र पक्षगोचर स्यार्थं न केवलं नीलं समलतेह्य तथापि मनुष्य च आकाशं तत् प्रत्यक्षं स्पर्श इन्द्रिय गोचरिभूतं भवति । नीलं खत: वायो: प्रत्यक्षं स्पर्शेन्द्रियं गोचरं भवति । साधारणं मनुष्य आकाशनीला: वुध्यते । अस्य औपचारिकं मन्यते । न्याय शास्त्र वायु तथाकाशं प्रत्यक्षं न मन्यते । परन्तु वेदान्तेन मन्यते ।

आशीर्वचन संयुक्ता स्तुतिर्यस्मातप्रयुज्यते
देवाद्विज नृपादीनां तस्मान्नादीतिसंज्ञिता ।
मांगल्यशं चन्द्रावान कोककैरवसैतिमि
पदैर्युक्ता द्वादशाभि अष्टमीणा पदैइवा ॥ (साहित्यदर्पण) (१)
पादंपदमिन्याहु: पदमुच्यते ।
पुनश्च श्लोक: पादं पदं किंचित् सुपन्निमथापरो ।
परेअवन्तर वाक्यैकं पदमुचिरे । (नाट्यदर्पण:) (२)

यास्थिता ब्याप्तविश्वं- आकाशाख्या मूर्त्ति: भगवत शिवस्य स्वरूपं व्याप्तं कृत्वा स्थिता वर्त्तते । शब्दगुणमाकाशम् । वायुवण्डलादारभ्य अन्तं यावत् श्रुति विषयगुणा भवति । श्रुति: श्रवणोन्द्रियस्य माध्यमेन श्रुयते । विश्वेव्याप्तं भवति । य ईशस्येकं रूपम् ।

यामाहु: सर्ववीजप्रकृतिरिति- यां पृथ्वीं सर्ववीज अंकुरोद्गमादि वृक्षलतादीनामाधारा: भवन्ति । येन वैज्ञानिका: वदन्ति आलोकं जलं भूमि: त्रय: अंकुरोदगमाय नूनमावश्यकतां भवति । यत् वृक्षलतादिनां व्याप्ते सति अम्लजाना: ते वृक्षा: ता:लता: नि:सरन्ति तथा अस्माकं प्राणिनां अंगारकाम्ला: ते ता:श्च ग्रहणं कृत्वा जीवन्ति । एतै: क्रिया:भि: पृथिव्यां वायुमड्ुलस्य उत्तापा: समतुला: भवन्ति । येन विश्व तापमाना प्रक्रिया: समानाभूत्वां उत्तरमेरो: तुषारा: न तरलं भजन्ति । अन्यथा पृथ्विव्या: तुषारा: हिमालयस्यापि तुषारा: स्वल्पं वर्ष: तरलं भविष्यन्ति । विश्वतापमात्रा हेतो: अनुदिनं उत्तापवृद्धि: भवति । येन प्राणिनामुपरि प्रचण्डम् उष्मताया: हेतो: जलभाग: स्थलभागात् परिमाणम् अनुदिनं वृद्धिं भवति । अत: वृक्षलतादिकम् अंकुरितं भूत्वा यां पृथ्वीं सुस्थं कृत्वा तष्ठति ।

**संदर्भ ग्रन्थसूची**


१. आशीर्वचन संयुक्ता स्तुतिर्यस्मातप्रयुज्यते । देवाद्विज नृपादीनां तस्मान्नादीतिसंज्ञिता ॥
मांगल्यशं चन्द्रावान कोककैरवसैतिमि । पदैर्युक्ता द्वादशाभि अष्टमीणा पदैइवा ॥ (साहित्यदर्पण)

२. पुनश्च श्लोक: पादं पदं किंचित् सुपन्निमथापरो ।
परेअवन्तर वाक्यैकं पदमुचिरे । (नाट्यदर्पण:)

याचप्राणिनः प्राणवन्तः- प्राणिनामम्लजानादिकं प्राप्यते प्राणवन्तः भवन्ति । प्राणं वायुं विना प्राणिनः पृथिव्यां न तिष्ठिष्यन्ति । भगवान् शिवः प्राणिनां कृते जगत् परिपालनं करोति । वायुः प्राणिनां जीवनानि भवन्ति । तान् विना सृष्टिः न तिष्ठिष्यति । अतः

प्रत्यक्षाभिः प्रपन्न तनुभिश्वतु र्वस्ताभिरष्टाभिरिशः- एते अष्ट रूपा शिवः प्रत्यक्षरूपेण संसारं परिपालनं करोति ।

अतः-

ते १- या सृष्टेराद्यासृष्टिः- जलम्

२- वहति विधिहुतं- अग्निः

३- याहविःर्याच होत्रिः- यजमानः

४- येद्वेकालंविधत्तः- सूर्यः, चन्द्रः

५- श्रुतिविषयगुणाः- शब्द विषयगुणाः

६- यास्थिताः ब्याप्तविश्वम्- आकाशम्

७- यामाहुसर्वविज प्रकृतिरिरितिः- पृथ्वीः

८- ययाप्राणिनः प्राणवन्तः- वायुः

एते प्रत्यक्षाभिः प्रपन्न तनुभिर्वस्तारष्टाभिरिशः । अस्मान् शिवस्य अष्टस्वरूपाः अष्टतनुः प्रत्यक्षरूपेण संसारं प्रतिपालयति ।

महाकविना कालिदासेन अनेनमंगलाचरणेन श्लोके द्वितीय अर्थे या शकुन्तलास्त्रष्टुः ब्रह्मणः आद्याश्रष्टा सृष्टिः, कृतिः सौन्दर्यातिशय शालित्वात् तादृशसृष्टेः रजाततत्वाद वा याच विधिहुतं विधिनां गर्भाधान विधानेन हुत- निषिक्तमिति विधिहुतं हविः- वीजं दुष्यन्तेना आहितं- वीर्यं वहति-धत्ते । एतेन शकुन्तलायाः गर्भावस्था सूच्यते । याच होत्री उपकुलपतिः कण्वमुनिः । ये द्वे- सख्यौ-अनसूया-प्रियंवदा । कालं-महर्षेर्दुर्वाससः शापावसानसमयं विधत्तः-धारयत-जानीतः एतेने ते द्वे सख्यौ-सूचिते । श्रुति विषयगुणायाः-श्रुति विषयो गुणानाम अयंः-शुभावहो विधिः यस्याः सा श्रुतिविषय गुणायाः यद्वा विषयौ देशः-श्रुतो विषयैः-विषय बास्तवश्लोकैः गुणानामयः-शुभावहो विधिः यस्याः सा श्रुतिविषय गुणाया । एतेन दुष्यन्तराष्ट्रगमनं तत्तिरोधानं च सूचितं भवति । या पतिब्रत्यादि गुणैः विश्वं ब्याप्य-सकलं लोकं व्याप्यस्थिता । एतेन सूदूर कश्यपाश्रम निवासः सूचितः । यामाहुः सर्वबीज प्रकृतिः इत्यनेन नामग्रहणान्नमाकदेशमहणमितिरित्या सर्वदमनख्या बीजस्य योनिरूत्पत्ति कारणभित्यर्थ लाभात् सर्वदमन कुमारस्तदुत्पत्तिश्च सूच्यते । यया प्राणिनः प्रजाः प्राणवन्तः प्रह्रष्टाः इत्यनेन शकुन्तला दुष्यन्तः सर्वदमनानां पुनः स्वराज्ये प्रत्यागमनं सूचितम् । ईश-राजादुष्यन्तः इति इत्थमष्टाभिः तनुभिः प्रकृत्यादिभिः विभूतिभिः-अष्टानां लोकपालानां कलाभिः वा प्रपंन्नः युक्तः समवेतोवा स्वं राज्यम् अवतु-पालयतु । एतेन नाटकोऽर्थः सूचितो भवति ।

अत्र सर्वारीतीनां मुख्या रीतिः बैदर्भिः । गुणेषु-प्रधानः प्रसाद गुणः । सृष्टिः स्त्रष्टुः वहतिहुत, प्राणिप्राण, भिर्भी, इत्यानुप्रासालंकारः । अग्नेहविः स्वभाव वहनादि वर्णनात् स्वभायाक्तिः याहविर्याच होत्रीति विरोधाभासः प्रत्यक्षभिः ताभिः तनुभिः प्रपन्न इति समासोक्तिश्चालंकारः । स्त्रगधराछन्दश्च विज्ञेयम् । नान्दीश्लोकत्वादस्य सर्वगुरुं क्षमकरो मगणः । तथा चोक्तं भामहेन-

क्षेमं सर्वगुरुर्दमगणो भूमि दैवतः इति ।

"यास्त्रष्टुः सृष्टिराद्येति पदमष्टपदानान्दी

नान्दी स्वरूपं चप्रोक्तं साहित्य दर्पणे ।” (साहित्यदर्पण) (१)

“आशीर्वचनसंयुकता स्तुतिर्थस्मात् प्रयुज्यते ।

देवद्विज नृपादीनां तस्मान्नादीति संज्ञिता ।” (साहित्यदर्पण ६/२४) (२)

“मांगल्यशंखचन्द्राब्ज कोक करववशंसिनी

“पदैर्युक्तादद्वादशभिरष्टाभिर्वा पदैरुत ॥” (साहित्यदर्पण ६/२५) (३)

“यद्वा- श्लोकपदं पदंकेचित् सुप्तिमडन्तमथापरे

परेऽवान्तरवाक्यैक स्वरूपं पदमूचिरे ।” (नाट्यप्रदीप:) (४)

**संदर्भ ग्रन्थसूची**


१. “यास्त्रष्टु: सृष्टिराद्येति पदमष्टपदानान्दी
नान्दी स्वरूपं चप्रोक्तं साहित्य दर्पणे ।” (साहित्यदर्पण)

२. “आशीर्वचनसंयुकता स्तुतिर्थस्मात् प्रयुज्यते ।
देवद्विज नृपादीनां तस्मान्नादीति संज्ञिता ।” (साहित्यदर्पण ६/२४)

३. “मांगल्यशंखचन्द्राब्ज कोक करववशंसिनी
“पदैर्युक्तादद्वादशभिरष्टाभिर्वा पदैरुत ॥” (साहित्यदर्पण ६/२५)

४. “यद्वा- श्लोकपदं पदंकेचित् सुप्तिमडन्तमथापरे
परेऽवान्तरवाक्यैक स्वरूपं पदमूचिरे ।” (नाट्यप्रदीप:)


तत्र नाट्यशास्त्रंमतम्-

“सूत्रधारो पठेन्नान्दीं मध्यमं स्वरभाश्रित: ।

मध्यमस्वरसंयुक्ता ततो नान्दीमुदीरयेत् । (नाट्यशास्त्रंमत:)

इत्थं पूर्वरंमस्य मुख्यांगरूपेण नान्दी- विथानान्तरं नाटकस्यारम्भवं सूचयितुमुप क्रमते नान्दयन्त इति । नाय्यन्ते समाप्ते अवसानेगसमाप्तौ या सृष्टि: स्त्रष्टुरादयेपि मंगलाचरणश्लोकरूप नान्दीपाठानन्तरं प्रविशति सूत्रधार: । इदमत्र रहस्य नान्दी नामे मंगलाचरणं तच्च प्रारब्धस्थ नाटकस्य निर्विघ्नं परिसमाप्तये यथाभिमतं तदय्यमवश्यं विधाय रङ्गान्त: प्रविशति सूत्रधार: । एवं पूर्वं नान्दी तत: सूत्रधारस्य प्रवेश इत्यायाति । संप्रत क्वचिदस्य विपर्ययोऽपिश्यते ।

नान्दीपद ब्युत्पत्तिस्तु नन्दयति-आनन्दयति जनानिति नान्दी यद्वानन्दति देवता अस्यामनया वेति नान्दी । नाटकादौ प्रथमं विहितं मंगलार्थं पद्यम् । नान्दी लक्षणं यथा-

देवता दिनमास्कार मङ्गलारंभपाठकै:

या क्रिया नन्दन्ते नाट्यारम्भे नान्दीतु सा स्मृता । (साहित्यदर्पण)

इत्थम् अभिज्ञानशाकुन्तले योगीराजशिवस्य अष्टमूर्त्तय: (क्षित्, अप्, तेज, मरुत् व्योम्, चन्द्रसूर्य यजमाना: एते अष्टमूर्त्तय: ईश: संसारस्य परिपालनं करोति । सूत्रधारमाध्यमेन मंगलाचरणं गानं प्रसंगे कविवर कालिदास: शिवं स्मृत्वा प्रत्यक्षरूपेण स: पृथिव्यामस्ति । कालिदास: ईशस्य एतादृशी अष्टमूर्त्तय: आविष्कृत्य पृथिव्या: संसारस्य कोणानुकोणेन शिव: प्रत्यक्षरूपेण अस्ति

इत्यस्य आविष्कारः सनातनधर्मेण विद्यन्ते इति प्रतिपादितम् । सनातन धर्म एव भारतस्य मूलधर्मः । कदा आसीत् विश्वगुरु अधुनापि (जि-२०) सम्मेलने भारतस्य विश्वगुरुत्वम् प्रतिपादितम् । सर्वेदेशारपि स्वीकुर्वन्ति स्म । केवलं चिनदेशः तथा ऋषिआदेशः अस्माकं भारतवर्षं जि-२० सभां न आगताः । नटराजमूर्त्तेः अत्र तथा कोणार्कस्य सूर्य मन्दिरस्य चक्रमपि ओड़िशायाः प्रदर्शितम् । विश्ववासिनः मुख्याः प्रदर्शिताः । शिवः मङ्गलमयः सृष्टिस्थितिः प्रलयस्य हेतुभूतः । सः दर्शकान पाठकान् च रक्षतु । ग्रन्थस्य निर्विघ्न परिशमाप्ति निमित्तं महाकविना कालिदासेन एदातृशं वर्णितम् ।

। इतिशम् ।